Roll No.........................

Signature of Invigilator .........

Paper Code

BV-403

# पतंजलि विश्वविद्यालय

## University of Patanjali

### Examination August-2021

### बी. ए. व्याकरण, चतुर्थसत्रम्

### व्याकरणम्, तृतीयपत्रम्

### संस्कृतसाहित्यम्

समयः - होरात्रयम्                                                    पूर्णाङ्काः 70

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

## (खण्ड -क)

## (राजकुमारिकथा)

प्र01. पृष्टेषु चतुर्षु प्रश्नेषु द्वयोः समाधानं कुरु। (शब्दार्थो वाक्यान्वयच (5 x2 =10)

1. स्नेहोन्मुखं पितरमेकपदे कथं वा, शोकश्रुदुर्दिनमुखीं जननीं च हित्वा।

   अम्लानसौहृदनिरन्तरमानसांश्च, त्यक्त्वा कथं नु सुहृदस्तपसे रमध्वम्।।

2. भवन्त्यकाले तपसः प्रयोगाश्चन्द्रोपरागा इव सोपसर्गाः।

   तस्मादितो बुद्धिरियं कुमार्यो निवर्ततामुत्पथचारिणीव।।

3. भवनेषु नरेन्द्र भागधेयान्युपयुज्यानि भवान्तरार्जितानि।

   मुषिता इव हीनदीनचित्ता भवकान्तारपरायणा भवन्ति।।

4. तदलं परिणामदारुणैस्तैः, प्रियबन्धो प्रियसंगमाभिलाषैः।

   ध्रुवमेह हि विप्रयोगदुःख प्रियसंगोरताशया लभन्ते।।

प्र02. पृष्टेषु त्रिषु प्रश्नेषु द्वयोः समाधानं कुरु। (5 x2 =10)

1. सप्तकुमारिकावदानकथायाः सारो लेखनीयः।

2. शब्दार्थो वाक्यान्वयश्च द्वयोः श्लोकयोः लेखनीयः।

   जगदध्रुवमेतदस्वतन्त्रं विषयाशीविषपूगसंनिरुद्धम्।

   अवगम्य भवेषु ये रमन्ते पशवस्ते नरविग्रहोपनीताः।।

3. यदितु प्रियतास्ति काचिदस्मास्वनुजानीष्व महीपते ततोऽस्मान्।

   अनवद्यमहार्यमार्यजुष्टं सुखमास्वादयितुं हि नो मनीषा।।

## ( खण्ड -ख)

## ( अभिज्ञानशाकुन्तलम् )

प्र01. पृष्टेषु त्रिषु प्रश्नेषु द्वयोः समाधानं कुरु। ( व्याख्या करणीया ) ( 5 x2 =10)

1. विचिन्तयन्ती यमनन्यमनसा तपोधनं वेत्सि न मामुपस्थितम्।
   स्मरिष्यति त्वां न स बोधितोऽपि सन्।
   कथां प्रमत्तः प्रथमं कृताभिव।।
2. अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
   जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा।।
3. अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः।
   परभृतविरुतं कलं यथा प्रतिवचनी कृतमेभिरीदृशम्।।

प्र02. पृष्टेषु त्रिषु प्रश्नेषु द्वयोः समाधानं कुरु। ( 5 x2 =10)

1. "अभिज्ञानशाकुन्तलम्" इति ग्रन्थस्थ कविपरिचयोः लेखनीयः।
2. अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।
   अपघ्नन्तो दुरितं ह्व्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु।। (व्याख्या)
3. अन्तर्हिते शशिनि सैव कुमुद्वती मे, दृष्टिं न नन्दयति संस्मरणीयशोभा
   इष्टप्रवासजनितान्यबलाजनस्य दुःखानि नूनमतिमात्रसुदुःसहानि।। (व्याख्या करणीया)

प्र03. पृष्टेषु द्वयोः प्रश्नयोः एकस्य समाधानं कुरु। ( 5 x1 =5)

1. "अभिज्ञानशाकुन्तलम्" इति ग्रन्थस्य चतुर्थाङ्कस्य सारो लेखनीयः।
2. शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
   भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
   भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी,
   यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।। (व्याख्या करणीया)

## ( खण्ड -ग)

## ( काव्यदीपिका )

प्र01. पृष्टेषु सप्तसु प्रश्नेषु पञ्च प्रश्नाः समाधेया कुरु। ( 5 x5 =25)

1. पदमात्रगता दोषाः लेखनीयाः।
2. गक्यमात्रगताः केचन् त्रयः दोषा लेखनीयाः।
3. प्रसादगुणस्य लक्षणं तद्व्यञ्जकान् वर्णान् च लिखन्तु।।
4. माधुर्य्यगुणस्य लक्षणं व्याख्या च करणीया।
5. रसगतान् दोषान् प्रदर्श्य द्वयोर् व्याख्या करणीया।
6. "दुःश्रवत्वम्" इति दोषः कुत्र भवति? सोदाहरण प्रदर्शयन्तु।
7. "सन्दिग्धता" इति दोषः कुत्र भवति? सोदाहरण लिखन्तु।

--------------x--------------